# Nagnabhairava Stuti Bhrishundikrita

# ભૃશુણ્ડિકૃતા નગ્નભૈરવસ્તુતિઃ

## Document Information

Text title : Nagnabhairava Stuti Bhrishundikrita

File name : nagnabhairavastutiHbhRRishuNDikRRitA.itx

Category : shiva, mudgalapurANa, stuti

Location : doc_shiva

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 28 | 6.28 35-48||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# ભૃશુણ્ડિકૃતા નગ્નભૈરવસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
ભૃશુણ્ડ્યુવાચ ।
સર્વમાયાવિહીનાય સર્વમાયાપ્રચાલક ।
સર્વાન્તર્યામિણે નિત્યં નગ્નભૈરવ તે નમઃ ॥ ૩૫॥
મયૂરેશપરાયૈવ મયૂરપુરપાલક ।
ધર્મિષ્ઠાનાં સુપાલાય નગ્નભૈરવ તે નમઃ ॥ ૩૬॥
અધર્મનિરતાંશ્ચૈવ બહિઃકારાય દેવપ ।
સદા સ્વાનન્દનિષ્ઠાય નગ્નભૈરવ તે નમઃ ॥ ૩૭॥
સંસ્કારયુક્તભાવેન પાપકર્મપરાત્મનામ્ ।
મયૂરે દણ્ડકર્ત્રે વૈ નગ્નભૈરવ તે નમઃ ॥ ૩૮॥
મહાબલધરાયૈવ બ્રહ્માદીનાં પ્રચાલક ।
અમેયશક્તયે દેવ નગ્નભૈરવ તે નમઃ ॥ ૩૯॥
ભુક્તિમુક્તિપ્રદાત્રે ચ ધનધાન્યવિવર્ધન ।
ગાણેશાનાં પ્રપાલાય નગ્નભૈરવ તે નમઃ ॥ ૪૦॥
પ્રલયે શૂલમુદ્યમ્ય બ્રહ્માણ્ડભયકારક ।
શૂલપ્રોતમહાણ્ડાય નગ્નભૈરવ તે નમઃ ॥ ૪૧॥
અટ્ટહાસેન દેવેન્દ્રાંસ્તથા સન્ત્રાસ્ય ચાસુરાન્ ।
નૃત્યસે ગણનાથાગ્રે નગ્નભૈરવ તે નમઃ ॥ ૪૨॥
વિશ્વં તતં સર્વમિદં ત્વયેશ આદ્યન્તમધ્યેષુ મહાનુભાવ ।
સંરક્ષ દેવેશ મયૂરસંસ્થાનસ્માન્ કુરુષ્વ ત્વમનન્યભાવાન્ ॥ ૪૩॥
શૂલિન્નમસ્તેઽખિલકારણાય ત્વદ્ભીતિભાવેન જગત્પ્રવૃત્તિઃ ।
વ્યાપારયુક્તં વિવિધેષુ નિત્યં સ્વસ્વપ્રકાર્યં પ્રકરોતિ ચાત્મન્ ॥ ૪૪॥
અતસ્ત્વદાધારમયં પરેશ સુરક્ષ તે ભક્તિયુતં કુરુષ્વ ।
ગણેશક્ષેત્રં ત્વદધીનગં તું ગણેશસંસ્થં કુરુ તે નમો વૈ ॥ ૪૫॥
(ફલશ્રુતિઃ)

ઇદં સ્તોત્રં મહેશાના નગ્નભૈરવકસ્ય ચ ।
યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ સર્વં પ્રલભેચ્છુભમ્ ॥ ૪૬॥
ધનધાન્યાદિકં સર્વં ભુક્તિમુક્તિસમન્વિતમ્ ।
લભેદનેન દેવેશાસ્તુવિધ્વં નગ્નભૈરવમ્ ॥ ૪૭॥
મયૂરક્ષેત્રત્યાગશ્ચ કદાપિ ન ભવેન્નૃણામ્ ।
સ્તોત્રેણ સ્તુવતાં નિત્યં ન કિઞ્ચિદ્ દુર્લભં ભવેત્ ॥ ૪૮॥

ઇતિ ભૃશુણ્ડિકૃતા નગ્નભૈરવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૨૮ । ૬.૨૮ ૩૫-૪૮॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 28 . 6.28 35-48..

Proofread by Yash Khasbage, Preeti Bhandare

*Nagnabhairava Stuti Bhrishundikrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*